Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमन्मोहन-यशःस्मारक-जैनग्रन्थमालायां ग्रन्थाङ्कः २

प्रवचनप्रभावक-श्रीखरतरगच्छनभोनभोमणि-सुविहितचक्रचूडामणि-क्रियोद्धारक-श्रीमन्मोहनमुनीश्वर-विनेयविनेयानुयोगाचार्य-
श्रीमत्केशरमुनिजीगणिवरसङ्कलितस्तच्छिष्य-बुद्धिसागरगणिपरिष्कृतश्च श्रीवर्द्धमानस्वामिनः

# कल्याणकपरामर्शः

सम्पादकः-बुद्धिसागरो गणिः

प्रकाशकः-मुम्बापुरीमहावीरजिनालयस्थ-श्रीजिनदत्तसूरिभाण्डागारकार्यवाहको झवेरी-मूलचंद हीराचंद भगत.

निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २६।२८ तमे गृहे रामचन्द्र येसू शेडगेद्वारा मुद्रापितः ।

वीराब्दाः २४६८ विक्रमाब्दाः १९९८ खिस्ताब्दाः १९४१

( प्रतयः २५० ) ( पण्यमाणकचतुष्टयम् )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

Printed by Ramachandra Yesu Shedge, at the "Nirnay-sagar" Press, 26-28, Kolbhat Street, Bombay.

Published by Mulchand Hirachand Bhagat, Managing Trustee, Mahavira Swami Jain Mandir, Jinadatta Suri Jnana Bhandar, Pydhuni, Bombay 3.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमोऽस्तु सञ्जातकल्याणकषट्काय श्रमणाय भगवते महावीराय

श्रीमन्मोहन–यशःस्मारक–जैनग्रन्थमालायां—

परमशासनप्रभावक–श्रीखरतरगच्छगगनाङ्गणप्रभासनैकभानु–सुविहितचक्रचूडामणि–क्रियोद्धारक–श्रीमन्मोहनमुनीश्वरविनेय-विनेयानुयोगाचार्य–श्रीमत्केशरमुनिजीगणिवरसङ्कलितस्तच्छिष्य–बुद्धिसागरगणिपरिष्कृतश्च श्रीवर्द्धमानस्वामिनः

# कल्याणकपरामर्शः

प्रणम्य श्रीजिनं वीरं, शासनाधीश्वरं मुदा । कल्याणकपरामर्शः ×, क्रियते शास्त्रयुक्तितः ॥ १ ॥

वन्दे वीरं गर्भरूपं, सदा कल्याणरूपकम् । मन्यन्ते भाग्यवन्तः ! किं, ह्यकल्याणकरूपकम् ? ॥ २ ॥

जल्पनमेतदकल्याणकवादिनां, यदुत–"करोषि श्रीमहावीरे, कथं कल्याणकानि षट् ? । यत्तेष्वेकमकल्याणं, विप्रनीचकुलत्वतः ॥१॥" इति गुरुतत्त्वप्रदीपे । "अकल्याणकभूतस्य गर्भापहारस्य" इति कल्पकिरणावल्यां । "नीचैर्गोत्रविपाकरूपस्य अतिनिन्द्यस्य

× वीरजिनस्य कल्याणकानां पञ्चकं षट्कं वेति परामर्शो–विचारः । न च वाच्यं–च्यवनादीनां षण्णां कल्याणकत्वेन व्यावर्णनमनागमिकं, "जो भगवता उसभसामिणा सेसतित्थगरेहि अ वद्धमाणसामिणो चवणाईणं छण्हं वत्थूणं कालो दिट्ठो णातो वागरिओ अ" इति पर्युषणाकल्प–दशाश्रुतस्कन्ध-चूर्ण्योर्वाक्यस्य तथा "हस्त उत्तरो यासां उत्तरफाल्गुनीनां ता हस्तोत्तरास्ताश्च पञ्चसु स्थानेषु–गर्भाधान-संहरण-जन्म-दीक्षा-ज्ञानोत्पत्ति-लक्षणेषु संवृत्ताः, अतः पञ्चहस्तोत्तरो भगवानभू"दित्याचाराङ्गवृत्तिवाक्यस्य च बाधकत्वादिति, यतो न व्यभिचरति कल्याणकत्वं वस्तुस्थाने, यथा शिंशपात्वं वनस्पतिवृक्षौ, कल्याणकाकल्याणकयोरुभयत्रापि वस्तुस्थानयोर्घटमानत्वात् ।

For Private and Personal Use Only

कल्याणक-परामर्शः ॥ १ ॥

आश्चर्यरूपस्य गर्भापहारस्यापि कल्याणकत्वकथनमनुचितं" इति कल्पसुबोधिकायां। "गर्भापहारोऽशुभः" इति च क० सु० टिप्पण्यां।
परामर्शोऽत्र–विप्रनीचकुलाश्चर्य–गर्भापहारकारणैः। गर्भाधानमकल्याणं, गर्भकल्याणकं कथम्? ॥३॥ आश्चर्यमपि कल्याणं, श्रीमल्लिवीरयोर्मतम्। नीचनिन्द्याशुभैर्वाक्यै–रकल्याणं कथं भवेत्? ॥४॥ कल्याणं च्यवनं प्रोक्तं, गर्भकल्याणकं तथा। अवतरणकल्याण–मकल्याणं कथं भवेत्? ॥ ५ ॥ यत उक्तं–"गब्भे जम्मे य तहा, णिक्खमणे चेव णाणणिव्वाणे। भुवणगुरूण जिणाणं, कल्लाणा होंति णायव्वा ॥ ३१ ॥" इति पञ्चाशके। तथा "अवयरणजम्मणिक्खमण–णाणणिव्वाणपंचकल्लाणे। तित्थयराणं नियमा, करंति सेसेसु खित्तेसु ॥ १ ॥" इति जिनभद्रीयबृहत्सङ्ग्रहण्यां। नीचकुलेऽवतीर्णश्चे–द्वीरः कल्याणको मतः। उच्चकुलागतो वीरः, किमकल्याणको मतः? ॥ ६ ॥ चेत्क्षत्रियकुलायातो, गर्भः कल्याणको मतः। विप्रकुलेऽवतीर्णो हि, किमकल्याणको मतः? ॥ ७ ॥ देवानन्दोदरे गर्भो, यथा कल्याणरूपकः। तथैव त्रिशलाकुक्षौ, गर्भः कल्याणको मतः ॥ ८ ॥ यावद्गर्भतयोत्पत्तिं, च्युत्वा गत्यन्तराद्यथा। बुधैश्च्यवनकल्याणं, मतं गणधरादिभिः ॥ ९ ॥ तथैव–हरणं वाऽपहारस्तत्–त्रिशलोदरधारणम्। गर्भधारणकल्याणं, तत्त्वकल्याणकं कथम्? ॥१०॥ तावदपहृतो गर्भ–स्त्रिशलाकुक्षिसंहृतः। अतो गर्भापहारो हि, श्रेयःकल्याणसूचकः ॥११॥ "गर्भस्योदरसत्त्वस्य", इति स्थानाङ्गवृत्तितः। हरणमुदरान्तर–सङ्क्रामणं× तु श्रेयसे ॥१२॥ उक्तं च कल्पसूत्रे शक्रविचारणायां–"तं सेयं खलु मम वि समणं भगवं महावीरं" इत्यादि यावत् "तिसलाए खत्तिया-

च्यवन-गर्भादि-नामान्त-राणि, गर्भापहार-शब्दार्थः ॥ १ ॥

× "गर्भस्य–(स्त्रीकुक्षिसमुद्भूतसत्त्वस्य) श्रीवर्द्धमानरूपस्य हरणं–(अन्यस्त्री) त्रिशलाकुक्षौ सङ्क्रामणं गर्भहरणं" इति (प्रव० सारो० वृ०) कल्पदीपिकायां च।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णीए वासिट्ठसगुत्ताए कुच्छिसि गब्भत्ताए साहराविત્તए" इति । त्रिशलोदरगो गर्भः, पञ्चकल्याणमध्यगः । प्रोक्तः श्रीभद्रबाहुभिः, स्वप्नैः कल्याणको हि सः ॥ १३ ॥ प्रोक्तः पञ्चाशके गर्भो, यथा कल्याणरूपकः । पुनरत्र तथा प्रोक्तः, त्रिशलोदरगो हि सः ॥ १४ ॥ सुष्ठु प्रोक्तं हि कल्याणं, जिनवल्लभसूरिभिः × । दुष्टमुक्तमकल्याणं, त्वत्पूज्यद्वेष्यता हि सा ॥ १५ ॥ प्रोक्तः पञ्चाशके गर्भः, कल्याणफलसूचकः । कल्पसूत्रेऽपि सः स्वप्नैः, कल्याणफलसूचकः ॥ १६ ॥ सूत्रार्थमपरं नास्ति, येनाकल्याणकं भवेत् । धृष्टा ब्रुवन्ति मूढाश्च, कर्मबन्धनहेतवे ॥ १७ ॥ देवानन्दोदराद्गर्भ-स्त्रिशलाकुक्षि( धारणात् )मोचनात् । ज्ञेयो गर्भो यथा पूर्वं, तथा कल्याणको हि सः ॥ १८ ॥ हरणं त्रिशलाकुक्षौ, विभोर्न मन्यते तदा । कल्याणकानि पञ्च स्या-दन्यथा तु षडेव हि ॥ १९ ॥ हरणं त्रिशलाकुक्षौ, मन्यन्ते श्वेतवाससः । दिगम्बरा न मन्यन्ते, देवानन्दोदराद्विभोः ॥ २० ॥ मातृकुक्ष्यागतः सार्वः, स्वप्नैः कल्याणसूचकः । त्रिशलाकुक्षिगो गर्भो, नास्त्यकल्याणको हि सः ॥ २१ ॥ "पंच महाकल्लाणा

---

× यत्तु **"जो न सेस सूरीणं, लोयणपहे वि वच्चइ"** इत्यनेन गणधरसार्द्धशतकगाथाशकलेन श्रीमद्धरिभद्रसूर्यभयदेवसूर्यादीनां हीलनाकरणादिरूपासद्दोषोद्भावनं जिनवल्लभसूरेस्तत्तु तदुद्भावयितुरेवानाघ्राततदर्थगन्धत्वाभिव्यञ्जकं, यतः **"यो न शेषसूरीणां-अज्ञातसिद्धान्तरहस्यानामित्यर्थः, लोचनपथेऽपि-दृष्टिमार्गेऽपि, आस्तां श्रुतिपथे, व्रजति-याति"** इत्यनेन तद्वृत्तिवाक्येन स्पष्टं तत्कालवर्त्तिवैद्यकज्योतिष्कमन्त्राद्यारम्भप्रसक्तचैत्यवासिसूरीणामेव गर्भापहारकल्याणकानभिज्ञत्वं ज्ञाप्यते, न तु हरिभद्रसूर्यादीनां प्रवचनविदां, तेषां तु **"वुच्चइ पुण जिणमयण्णूहिं-उच्यते पुनर्जिनमतज्ञै-र्भगवत्प्रवचनवेदिभिः"** इत्येताभ्यां गणधरसार्द्धशतकतद्वृत्तिवाक्याभ्यां स्फुटतरं प्रतिपाद्यते तज्ज्ञातृत्वमुपदेष्टृत्वं च, प्रकारान्तरेण गर्भाधानरूपत्वादेव गर्भापहारस्य **"गब्भे जम्मे"** इत्यादिना गृहीतत्वात् **"कल्लाणफला य जीवाणं"** इत्येतत्तत्कृतकल्याणकलक्षणस्यात्रोपलभ्यमानत्वाच्च, दर्शयन्तु-किमकल्याणफलं सञ्जातं जायते वा गर्भापहारदिनमालम्ब्य तपश्चर्यादिकर्तॄणां जगज्जीवानामिति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(परमश्रेयांसि), सवेसिं जिणाण हवंति णियमेण। भुवणऽच्छेरयभूया, कल्लाणफला य जीवाणं ॥ ३० ॥ गब्भे (गर्भाधाने) जम्मे य तहा, णिक्खमणे चेव णाणणिव्वाणे। भुवणगुरूण जिणाणं, कल्लाणा होंति णायव्वा ॥ ३१ ॥" (इदं) वचः पञ्चाशके पञ्च-महाकल्याणदर्शकम्। त्रिशलाकुक्षिगं गर्भं, नाकल्याणप्रलापकम् ॥ २२ ॥ उक्तगाथाद्विके गर्भो, महाकल्याणनिश्चितः। कथं भवत्यकल्याण-स्त्रिशलोदरगो हि सः? ॥ २३ ॥ हरणमपहारश्चे-त्त्वयाऽकल्याणको मतः। धारणं मातृकुक्षौ किं, त्वयाऽकल्याणकं मतम्? ॥ २४ ॥ भगवद्वीरगर्भश्चे-त्त्वया कल्याणको मतः। श्रीवीरो गर्भरूपश्च, किमकल्याणको मतः? ॥२५॥ उक्तं दिन * मनुक्तं तत्×, कल्याणकमशाश्वतम्। तेन किं त्रिशलाकुक्षौ, वीरोऽकल्याणको भवेत्? ॥ २६ ॥ पञ्च शाश्वतकल्याणा, एकेनाशाश्वतेन षट्। कल्याणकमशाश्वतं, केनाकल्याणकं भवेत्? ॥ २७ ॥ पञ्चकल्याणतः षष्ठ-मकल्याणं कथं भवेत्?। पञ्चमहाव्रतात्षष्ठमव्रतमपि किं भवेत्? ॥ २८ ॥ यथा-पञ्चमहाव्रतात्षष्ठं, रात्रावभोजनं व्रतम्। तथा-पञ्चकल्याणतः षष्ठं+,

---

* देवानन्दाकुक्षितस्त्रिशलाकुक्षिधारणात्मकस्य गर्भापहारस्य दिनमाश्विनकृष्णत्रयोदशीरूपं कल्पसूत्रादौ। × उक्तलक्षणमेव गर्भापहाराख्यमशाश्वतं कल्याणकं पञ्चाशके।

+ ननु सङ्ख्याक्रमेण द्वितीयमपि षष्ठत्वेनोच्यमानं कथं सङ्गच्छते? इति चेन्न, अभिप्रायापरिज्ञानात्, यतो यानिहि गर्भाधानादीनि पञ्च कल्याणकानि शाश्वतानि भवन्ति सर्वेषां जिनानां, तेभ्योऽतिरिक्तत्वात् षष्ठत्वेनास्य निरूपणं गणधरसार्द्धशतकवृत्त्यादौ, नतु सङ्ख्याक्रमापेक्षया। न चैतदसङ्गतं, आगमेऽप्येवंविधस्य वस्तुनिरूपणस्य विद्यमानत्वात्, यथा स्थानाङ्गस्य **"उवसग्गगब्भहरणं"** इत्यादिगाथाद्विके सङ्ख्याभावित्वेन द्वितीयमप्याश्चर्यमसंयतिपूजाख्यं दशमत्वेन विन्यस्तं, अत एव हि **"दसमगमच्छेरमिणं, असाहुणो साहुणुव्व पुज्जंति। होहिंति तप्पसाया, दुब्भिक्खदरिद्दडमरगणा ॥ १५७ ॥"** इति गाथया सम्बोधप्रकरणे कुगुरुवर्णनाख्ये द्वितीयेऽधिकारे श्रीहरिभद्रसूरिभिरपि दशमत्वेन निरूपितं, ततः किं गणधरा हरिभद्रसूरिप्रभृतयश्चाप्य'सङ्गतभाषिण' इति वक्तुं शक्यते केनापि?, न केनापि, तथा कल्याणकेऽपीति भावः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**कल्याणं गर्भधारणम् ॥ २९ ॥ ×जिनराज्याभिषेकस्तु, नास्ति कल्याणपञ्चके। गर्भधारणकल्याण–मस्ति**

× **"उसभे णं अरहा कोसलिए पंचउत्तरासाढे अभीइछट्ठे होत्था, तं जहा–उत्तरासाढाहिं चुए, चइत्ता गब्भं वक्कंते, उत्तरासाढाहिं जाए, उत्तरासाढाहिं रायाभिसेयं पत्तो, उत्तरासाढाहिं मुंडे भवित्ता आगाराओ अणगारियं पव्वइए, उत्तरासाढाहिं अणंते जाव (केवलवरनाणदंसणे) समुप्पण्णे, अभीइणा परिनिव्वुए"** इति जम्बूद्वीपप्रज्ञप्तिसूत्रं पुरस्कृत्य वीरस्य गर्भापहारद्वारा जातं त्रिशलाकुक्षिगर्भाधानमकल्याणकत्वेन प्रतिपादयन्ति ये, तैर्विचार्यमेतत् पद्यं। यतः–प्राङ्निर्दिष्टजम्बूद्वीपप्रज्ञप्तिसूत्रे **"पंचउत्तरासाढे"** इत्यादिपाठे सत्यपि यथा कल्पसूत्रे **"चउउत्तरासाढे"** इति पाठः समुपलभ्यते, न तथा वीरचरित्रवर्णने क्वाप्याचाराङ्ग–स्थानाङ्गप्रभृतिषु शास्त्रेषु **"पंचहत्थुत्तरे"** इत्यादिपाठवत् **"चउहत्थुत्तरे"** इत्यपि पाठः समुपलभ्यते।

अन्यच्च **"तदेव हि कल्याणकं यत्रासनप्रकम्पप्रयुक्तावधयः सकलसुरासुरेन्द्रा जीतमिति विधित्सवो युगपत्ससम्भ्रमा उपतिष्ठन्ते"** इति शान्तिचन्द्रीयजम्बू० प्र० वृत्तिगतं कल्याणकलक्षणं नात्यन्तिकं, तदेवात्यन्तिकं–यत्सर्वदा सर्वत्रावन्ध्यं, भवेदात्यन्तिकमेतल्लक्षणं चेत्तदा वीरस्य देवानन्दाकुक्षिगर्भाधाने कथं नोपतस्थुः सुरेन्द्रादयः ?।

ननु किं प्रमाणं ? यन्नैवोपतस्थुः सुरेन्द्रादयो भगवतो देवानन्दाकुक्षिगर्भाधानकाले इति चेत्कल्पसिद्धान्त एव प्रमाणमत्रार्थे, तथाहि–**"ते णं काले णं ते णं समए णं सक्के देविंदे देवराया"** इत्यादितः प्रारभ्य **"समणे भगवं महावीरे ××× आसोअबहुलस्स तेरसीपक्खे णं बासीइराइंदिएहिं विइक्कंतेहिं तेसीइमस्स राइंदिअस्स अंतरा वट्टमाणे हिआणुकंपएणं देवेणं हरिणेगमेसिणा ××× तिसलाए खत्तिआणीए ××× कुच्छिंसि गब्भत्ताए साहरिए"** इत्यादिपाठेन स्फुटतरमवगम्यते; यद् द्व्यशीतिदिवसात्यय एव ज्ञातं शक्रेण श्रीमन्महावीरदेवस्य देवानन्दाकुक्ष्यवतरणं, नार्वाक्। ज्ञातभवनानन्तरमेव हि ससम्भ्रममभ्युत्थाय सप्ताष्टपदान्यभिमुखं गत्वा भावतः शक्रस्तवेन वन्दित्वा सिंहासने समुपविश्य विमृश्य चैतादृशे कुलेऽर्हदादीनामनागमनादिकमविलम्बेनैव हरिणैगमेषिद्वारा गर्भपरिवर्त्तनस्य कारितत्वात्। न हीयद्दीर्घकालीनो द्व्यशीतिदिवसात्मकः सम्भवति स्वल्पबुद्धिमनुजस्यापि विमर्षणकालः, कथं नाम शक्रस्य ?।

अतो नायमकल्याणकवादिनिर्वर्त्तितं कल्याणकलक्षणमात्यन्तिकमवन्ध्यमपि च, किन्तु 'तदेव हि कल्याणकं–यद्भुवने आश्चर्यभूतं कल्याणफलं च भवति जगज्जीवाना' मित्येतदेव हि कल्याणकलक्षणमात्यन्तिकमवन्ध्यमपि च। न चैतदनागमिकं, यदुक्तं श्रीमद्धरिभद्रसूरिभिर्यात्रापञ्चाशके–**"भुवणऽच्छेरयभूआ, कल्लाणफला य जीवाणं ॥३०॥"** इति। एवमेवैतद्गाथाशकलव्याख्यायां श्रीमत्सुविहितग्रामण्यः खरतरगच्छगगनाङ्गणदिनमणयो नवाङ्गवृत्तिविधायकाः परमगुरवः **श्रीमदभयदेवसूरयो "भुवनाश्चर्यभूतानि–**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**कल्याणपञ्चके ॥ ३० ॥ सर्वगुणिजिनेन्द्रेऽस्मिन्, यदकल्याणभाषणम् । अकल्याणं तु तत्त्वस्य, प्रभोरवर्णवादतः ॥ ३१ ॥ कल्याणं शुभसमृद्धि–विशेषाणां हि कारणात् । नीरोगत्वमणन्तीति, कल्याणं श्रेयसे मतम् ॥ ३२ ॥ मातृपितृद्वयं सौख्यं, भुक्त्वाऽगात्स्वर्गमोक्षयोः । श्रीवीरस्य हि कल्याण–मकल्याणं कथं**

---

**निखिलभुवनाद्भुतभूतानि, त्रिभुवनजनानन्दहेतुत्वात्, तथा कल्याणफलानि च–निःश्रेयससाधनानि, चः समुच्चये, जीवानां–प्राणिनां''** इति । न च किमपि भुवनाश्चर्यभूतत्वं कल्याणफलत्वं वा जीवानां सञ्जाघटीति ऋषभराज्याभिषेके, शान्तिनाथादिचक्रित्वाभिषेकस्येतोऽप्यधिकतरत्वादनेकेषां च वधबन्धनादिनिबन्धत्वात् ।

श्रीमन्महावीरगर्भापहारे तु गर्भाधानत्वमेव प्रकारान्तरेण, कथमन्यथा **''समणे भगवं महावीरे तित्थगरभवग्गहणाओ छट्ठे पोट्टिलभवग्गहणे एगं वासकोडिं सामण्णपरियागं पाउणित्ता''** इति समवायाङ्गोक्ता तीर्थकृद्भवात्प्राक् षष्ठं पोट्टिलभवमिति गणधरोक्तिः सत्या भवेत् । न चैतत्सूत्रकाराभिप्रायं सूत्रकारा एव विदन्तीत्यपि वाच्यं, **''किल भगवान् पोट्टिलाभिधानो राजपुत्रो बभूव, तत्र वर्षकोटिं प्रव्रज्यां पालितवानित्येको भवः १, ततो देवोऽभूदिति द्वितीयः २, ततो नन्दनाभिधानो राजसूनुः छत्राग्रनगर्यां जज्ञे इति तृतीयः ३, तत्र वर्षलक्षं सर्वदा मासक्षपणेन तपस्तप्त्वा दशमे देवलोके पुष्पोत्तरप्रवरपुण्डरीकाभिधाने विमाने देवोऽभवदिति चतुर्थः ४, ततो ब्राह्मणकुण्डग्रामे ऋषभदत्तस्य ब्राह्मणस्य भार्याया देवानन्दाभिधानायाः कुक्षावुत्पन्न इति पञ्चमः ५, ततस्त्र्यशीतितमे दिवसे क्षत्रियकुण्डग्रामे नगरे सिद्धार्थमहाराजस्य त्रिशलाभिधानभार्यायाः कुक्षाविन्द्रवचनानुकारिणा हरिणैगमेषिनाम्ना देवेन संहृतस्तीर्थकरतया जात इति षष्ठः ६ । उक्तभवग्रहणं विना हि नान्यद्भवग्रहणं षष्ठं श्रूयते भगवत इत्येतदेव षष्ठभवग्रहणतया व्याख्यातं''** इत्येतद्व्याख्यापाठेन वृत्तिकारैरेव श्रीमदभयदेवसूरिमिश्रैर्देवानन्दा–त्रिशलागर्भाधानयोः पृथक् पृथग्भवग्रहणतया स्पष्टितत्वात् ।

अन्यच्च–**''एए चउदसमहासुमिणे, सव्वा पासेइ तित्थयरमाया । जं रयणिं वक्कमई, कुच्छिंसि महायसो अरहा ॥१॥''** इति कल्पसूत्रोक्तनियमेन कथं त्रिशलया चतुर्दशमहास्वप्ना दृष्टाः ?, किं कारणं ? सूत्रकारैरपि त्रिशलास्वप्नानामेव विस्तृतवर्णनमकारि, कथं वा साम्प्रतं वीरजन्मवाचनाह्नि घृतादिजल्पनपूर्वकं तेषामेव स्वप्नानामुत्तारणाद्युत्सवो विधीयते ? सङ्क्षेन सर्वत्रेत्यपि विमर्षणीयं स्वस्थचित्तेनेत्यलं चसूर्या, स्थितं च–नाकल्याणकत्वं वीरगर्भापहारे नापि च कल्याणकत्वमृषभराज्याभिषेके सिद्ध्यति कथमपीति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रुवे ? ॥ ३३ ॥ कल्याणं श्रेय उक्तं हि, श्रेयः कल्याणकं मतम् । मोक्षे वीरवियोगेऽपि *, मोक्षकल्याणकं
मतम् ॥ ३४ ॥ जन्मादिषु त्रयेष्वेव, कल्याणकेषु जायते । भुवनत्रय उद्योतः †, सार्वानां पुण्यशालिनाम्
॥ ३५ ॥ निर्वाणे तु तमःस्तोमो, लोके स्वर्गे च जायते । ब्रूते स्थानाङ्गसूत्रं + हि, ततोऽकल्याणकं किमु ?
॥ ३६ ॥ यच्चोक्तः स्थानके तुर्ये, § उद्योतो निर्वृतावपि । स हि देवागमाज्जातो ‡, न तु स्वाभाविको भवेत्
॥ ३७ ॥ ये ब्रुवन्ति भवत्येव, कल्याणपञ्चकेष्वपि । देवेन्द्राद्यागमस्तैर्हि, दर्शितव्यं प्रमाणकम् ॥ ३८ ॥
जन्मादिषु चतुर्ष्वेव, देवानां हि समागमः । प्रज्ञप्तो नियमेनैव, प्रज्ञप्त्यां × स्थानकेऽपि ¶ च ॥ ३९ ॥

---

* गर्भापहारे देवानन्दायाः स्वप्ना हृता अत उरस्ताडितस्तयेति जल्पाकैर्विमृश्यमिदं, किं न जातो वीरनिर्वाणे गौतमस्वामिनो विषादः ? । † "तिहिं ठाणेहिं लोगु-(देवु)ज्जोते (लोकोद्योतो लोकानुभावान्मनुष्यलोके देवागमाद्वा) सिया, तं जहा–अरहंतेहिं जायमाणेहिं, अरहंतेसु पव्वयमाणेसु, अरहंताणं णाणुप्पायमहिमासु" इति स्थान ३, उ० १। + "तिहिं ठाणेहिं लोगं(देवं)धयारे सिया, तं जहा–अरिहंतेहिं वोच्छिज्जमाणेहिं, अरिहंतपन्नत्ते धम्मे वोच्छिज्जमाणे, पुव्वगते वोच्छिज्जमाणे" इति स्थान ३, उ० १। § "चउहिं ठाणेहिं लोउज्जोते सिता, तं जहा–अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वतमाणेहिं, अरहंताणं णाणुप्पायमहिमासु, अरहंताणं परिनिव्वाणमहिमासु" इति स्थान ४, उ० ३। ‡ "लोकोद्योतश्चतुर्ष्वपि स्थानेषु देवागमात्, जन्मादित्रये तु स्वरूपेणापि" इति वृत्तौ । × "गोयमा! जे इमे अरिहंता भगवंता, एएसि णं जम्मणमहेसु वा, निक्खमणमहेसु वा, णाणुप्पायमहिमासु वा, परिनिव्वाणमहिमासु वा, एवं खलु असुरकुमारा देवा नंदीसरवरदीवं गया य गमिस्संति य" इति भगवत्यां १७० पत्रे। ¶ "चउहिं ठाणेहिं देविंदा माणुस्सं लोगं हव्वमागच्छंति एवं जहा तिठाणे" तथाहि–"एवं सामाणिया तायत्तीसगा लोगपाला देवा अग्गमहिसीओ देवीओ परिसोववन्नगा देवा अणियाहिवईदेवा आयरक्खा देवा माणुसं लोगं हव्वमागच्छंति" इति स्थान ४ उ० ३ ।

For Private and Personal Use Only

कल्याणक-परामर्शः ॥ ४ ॥

नैतावन्मात्रमेव, किन्तु–जन्मादिषु चतुर्ष्वेव, इन्द्राणां हि प्रजायते । उत्थानासनकम्पादि, स्थानके प्रोक्तमित्यपि* ॥ ४० ॥ निश्चयतवने नोक्तः, सुरेशादिसमागमः । ततः कथं प्रकुर्वीरन्, ध्रुवं कल्याणकोत्सवम् ? ॥ ४१ ॥ किञ्च–च्यवनेष्वपि देवाना–मागमो यदि निश्चितः । कथं तदैव शक्रेण, वीरो न वन्दितस्तदा ? ॥ ४२ ॥ च्यवनानन्तरं चैव, न वन्दित इति स्फुटम् । ज्ञायते कल्पवाक्येन, "केवलकप्प"मादिना † ॥ ४३ ॥ ज्ञानोत्पत्तेरनन्तरं, समवसरणादिकम् । इन्द्राः स्वयं न कुर्वन्ति, तेनाकल्याणकं किमु ? ॥ ४४ ॥ अष्टोत्तरशतेनैव, सिद्धो य ऋषभप्रभुः । तदाश्चर्यमभूदाद्यं, किमकल्याणकं हि तत् ? ॥ ४५ ॥ तथा–सिद्धान्तोऽयं जिनेन्द्राणां,

जन्मादिषु चतुर्ष्वेवेन्द्राणामासनप्रकम्पादिनिश्चयः, त्र्यशीतितमे एवाह्नि शक्रेण वन्दितो वीरः

---

* "तिहिं ठाणेहिं देवा अब्भुट्टिज्जा (सिंहासनादभ्युत्तिष्ठेयुरिति), तं जहा–अरहंतेहिं जायमाणेहिं, जाव तं चेव, एवमासणाइं चलेज्जा सीहणातं करेज्जा चेलुक्खेवं करेज्जा । तिहिं ठाणेहिं देवाणं चेइयरुक्खा चलेज्जा, तं जहा–अरहंतेहिं० तं चेव" इति स्थान ३ उ० १ । "जाव लोगंतिता देवा माणुस्सं लोगं हव्वमागच्छेज्जा, तं जहा–अरहंतेहिं जायमाणेहिं जाव अरिहंताणं परिनिव्वाणमहिमासु" वृत्तिः–"यथा त्रिस्थानके प्रथमोद्देशके तथा देवेन्द्रागमादीनि लोकान्तिकसूत्रावसानानि वाच्यानि, केवलमिह परिनिर्वाणमहिमास्विति चतुर्थमिति" स्थान ४ उ० ३ ।

† "केवलकप्पं जंबुद्दीवं दीवं विउलेणं ओहिणा आभोएमाणे २ विहरइ, तत्थ णं समणं भगवं महावीरं जंबुद्दीवे दीवे दाहिणड्ढभरहे माहणकुंडग्गामे नयरे उसभदत्तस्स माहणस्स कोडालसगुत्तस्स भारियाए देवाणंदाए माहणीए जालंधरसगुत्ताए कुच्छिंसि गब्भत्ताए वक्कंतं पासइ, पासित्ता हट्ठतुट्ठचित्तमाणंदिए णंदिए परमानंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहियए धाराहयनीवसुरभिकुसुमचंचुमालइयऊससियरोमकूवे विकसियवरकमलनयणवयणे पयलियवरकडगतुडियकेऊरमउडकुंडलहारविरायंतवच्छे, पालंबपलंबमाणघोलंतभूसणधरे ससंभमं तुरिअं चवलं सुरिंदे सीहासणाओ अब्भुट्ठेइ, अब्भुट्ठित्ता पायपीढाओ पच्चोरुहइ, पच्चोरुहित्ता"×××यावत् "मत्थए अंजलिं कट्टु एवं वयासी–नमुत्थु णं०" इत्यादि कल्पसूत्रे ५ पत्रे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेषामपि निश्चितः। तीर्थङ्करा हि सर्वेऽपि, जायन्ते पुरुषोत्तमाः ॥ ४६ ॥ परमेकोनविंशो हि, तीर्थकृन्मल्लिनामकः। स्त्रीरूपेण समुत्पन्नः, कुम्भराजस्य सद्मनि ॥ ४७ ॥ कार्यं न सुतरां तस्य, ह्यकल्याणत्ववादिभिः। कल्याणकेषु सर्वेषु, कल्याणत्वप्ररूपणम् ॥ ४८ ॥ नाश्चर्यस्थानवस्तुत्वं, कल्याणकत्वबाधकम्। कल्याणं 'जिनचन्द्र'स्य, गर्भाधानद्विके स्थितम् ॥ ४९ ॥ अन्यैरप्युक्तं–"सिद्धार्थराजाङ्गजदेवराज!, कल्याणकैः षड्भिरिति स्तुतस्त्वं। तथा विधेह्यान्तरवैरिषट्कं, यथा जयाम्याशु तव प्रसादात् ॥ १ ॥" इति जयतिलकसूरिकृते सुलसाचरित्रे षष्ठसर्गे, तथा "आषाढे सितषष्ठी १, त्रयोदशी चाश्विने २ सिता चैत्रे ३। मार्गे दशमी ४ सितवै–शाखे सा ५ कार्तिके च कुहूः ६ ॥ १ ॥ वीरस्य षट्कल्याणकदिनानी"ति जयसुन्दरसूरिकृते कल्पान्तर्वाच्ये×। "यौ कालसमयौ भगवता ऋषभदेवस्वामिना अन्यैश्च तीर्थङ्करैः श्रीवर्द्धमानस्य षण्णां च्यवनादीनां कल्याणकानां हेतुत्वेन कथितौ, तावेवेति ब्रूमः–'पंचहत्थुत्तरे होत्थे'ति हस्तादुत्तरस्यां दिशि वर्तमानत्वात् हस्तोत्तरा, हस्त उत्तरो यासां वा ता हस्तोत्तरा–उत्तराफाल्गुन्यः, बहुवचनं बहुकल्याणकापेक्षं, पञ्चसु–च्यवन १ गर्भापहार २ जन्म ३ दीक्षा ४ ज्ञान ५ कल्याणकेषु हस्तोत्तरा यस्य सः तथा, निर्वाणस्य स्वातौ जातत्वात्" इति तपागच्छीयकुलमण्डनसूरयः स्वीयकल्पावचूरौ। इत्यलम्प्रसङ्गेन, कल्याणकानि षडेव वीरस्येत्यागमज्ञाः "शिवमस्तु०"।

---

× "संवत् १५३८ वर्षे आषाढसुदि १५ सोमे श्रीतपागच्छनायकश्रीपूज्यभ०श्रीविजयरत्नसूरिशिष्येण" इत्युल्लेखान्विताऽस्ति प्रतिः सि० आ० क० सत्के चित्कोषे।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम्ना मोहनलालेति, ख्याता ये जगतीतले । खरतरगणस्तम्भा, जैनशासनमण्डनाः ॥ १ ॥

# इति कल्याणकपरामर्शः समाप्तः ।

तेषां प्रशिष्यपंन्यास-गणिः केशरसद्गुरुः । गणिं बुद्ध्यब्धिनामानं, भद्रं दिश्यात्स्वशिष्यकम् ॥ २ ॥ युग्मम् ।

For Private and Personal Use Only